# .. gAyatrI vandanA ..

# ॥ गायत्री वन्दना ॥

## Document Information

Text title : gAyatrIvandanA

File name : gAyatrIvandanA.itx

Category :

Location : doc_devii

Author :

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Ramgopal Bhimavarapu bhimavarapu2014 at gmail.com

Proofread by : Ramgopal Bhimavarapu bhimavarapu2014 at gmail.com

Translated by :

Description-comments :

Source : Gayatri Mahavigyan

Acknowledge-Permission:

Latest update : May 29, 2015

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ गायत्री वन्दना ॥

ॐकाररूपा त्रिपदा त्रयी च त्रिदेववन्द्या त्रिदिवाधिदेवी ।
त्रिलोककर्त्री त्रितयस्य भर्त्री त्रैकालिकी सङ्कलनाविधात्री ॥ १॥

त्रैगुण्यभेदात् त्रिविधस्वरूपा त्रैविध्ययुक्तस्य फलस्य दात्री ।
तथापवर्गस्य विधायिनी त्वं दयार्द्रदृक्कोणविलोकनेन ॥ २॥

त्वं वाङ्मयी विश्ववदान्यमूर्तिर्विश्वस्वरूपापि हि विश्वगर्भा ।
तत्त्वात्मिका तत्त्वपरात्परा च दृक्तारिका तारकशङ्करस्य ॥ ३॥
विश्वात्मिके विश्वविलासभूते विश्वाश्रये विश्वविकाशधामे ।
विभूत्यधिष्ठात्रि विभूतिदात्रि पदे त्वदीये प्रणतिर्मदीया ॥ ४॥

भोगस्य भोक्त्री करणस्य कर्त्री धात्वाव्ययप्रत्ययलिङ्गशून्या ।
ज्ञेया न वेदैर्न पुराणभेदैर्ध्येया धिया धारणयादिशक्तिः ॥ ५॥
नित्या सदा सर्वगताऽप्यलक्ष्या विष्णोर्विधेः शङ्करतोऽप्यभिन्ना ।
शक्तिस्वरूपा जगतोऽस्य शक्तिर्ज्ञातुं न शक्या करणादिभिस्त्वम् ॥ ६॥

त्यक्तस्त्वयात्यन्तनिरस्तबुद्धिर्नरो भवेद् वैभवभाग्यहीनः ।
हिमालयादप्यधिकोत्रतोऽपि जनैस्समस्तैरपि लङ्घनीयः ॥ ७॥
शिवे हरौ ब्रह्मणि भानुचन्द्रयोश्चराचरे गोचरकेऽप्यगोचरे ।
सूक्ष्मातिसूक्ष्मे महतो महत्तमे कला त्वदीया विमला विराजते ॥ ८॥

सुधामरन्दं तव पादपद्मं स्वे मानसे धारणया निधाय ।
बुद्धिर्मिलिन्दीभवतान्मदीया नातः परं देवि वरं समीहे ॥ ९॥

दीनेषु हीनेषु गतादरेषु स्वाभाविकी ते करुणा प्रसिद्धा ।
अतः शरण्ये शरणं प्रपन्नं गृहाण मातः प्रणयाञ्जलिं मे ॥ १०॥

॥ इति गायत्रीवन्दना समाप्ता ॥

Encoded and proofread by Ramgopal Bhimavarapu bhimavarapu2014 at gmail.com

.. gAyatrI vandanA ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*